॥ নিরগুণমানস পূজ ॥

শিষ্য উৰাচ ..

অখণ্ডে সচ্চিদানন্দে নিরিৰকল্পৈকরূপিণি .
স্থিতেদ্ৰিতীযভাৰেপি কথং পূজা ৰিধীযতে .. ১..
পূরণস্যাৰাহনং কুত্র সরৰাধারস্য চাসনম্ .
স্ৰচ্ছস্য পাদ্যমরঘ্যং চ শুদ্ধস্যাচমনং কুতঃ .. ২..
নিরমলস্য কুতঃ স্নানং ৰাসো ৰিশ্ৰোদরস্য চ .
অগোত্রস্য ত্ৰৰরণস্য কুতস্তস্যোপৰীতকম্ .. ৩..
নিরেলপস্য কুতো গন্ধঃ পুষ্পং নিরৰাসনস্য চ .
নিরিৰশেষস্য কা ভূষা কোলঙকারো নিরাকৃতেঃ .. ৪..
নিরঞ্জনস্য কিং ধূপৈরদীপৈরৰা সরৰসাক্ষিণঃ .
নিজানন্দৈকতৃপ্তস্য নৈৰেদ্যং কিং ভৰেদিহ .. ৫..
ৰিশ্ৰানন্দযিতুস্তস্য কিং তাম্বূলং প্রকল্পতে .
স্ৰযংপ্রকাশচিদ্রূপো যোসাৰরকাদিভাসকঃ .. ৬..
গীযতে শ্রুতিভিস্তস্য নীরাজনৰিধিঃ কুতঃ .
প্রদক্ষিণমনন্তস্য প্রণামোদ্ৰযৰস্তুনঃ .. ৭..
ৰেদৰাচামৰেদ্যস্য কিং ৰা স্তোত্রং ৰিধীযতে .
অন্তরবহিঃ সংস্থিতস্য উদ্ৰাসনৰিধিঃ কুতঃ .. ৮..

গুরুরুৰাচ ..

আরাধযামি মণিসংনিভমাত্মলিঙ্গম্
মাযাপুরীহৃদযপঙকজসংনিৰিষ্টম্ .
শ্রদ্ধানদীৰিমলচিত্তজলাভিষৈকৈ-
র্নিত্যং সমাধিকুসুমৈরনপুনরভৰায .. ৯..
অযমেকোৰশিষ্টোস্মীত্যেৰমাৰাহযেচ্ছিৰম্ .
আসনং কল্পযেত্পশ্চাত্স্ৰপ্রতিষ্ঠাত্মচিন্তনম্ .. ১০..
পুণ্যপাপরজঃসঙ্গো মম নাস্তীতি ৰেদনম্ .

পাদ্যং সমরপযেদ্ৱিদ্ৱন্সরৱকল্মষনাশনম্   ..  ১১..
অনাদিকল্পৱিধৃতমূলাজ্ঞানজলাঞ্জলিম্   .
ৱিসৃজেদাত্মলিঙ্গস্য তদেৱারঘ্যসমরপণম্   ..  ১২..
ব্রহমানন্দাব্ধিকল্লোলকণকোট্যংশলেশকম্  .
পিবন্তীন্দ্রাদয ইতি ধ্যানমাচমনং মতম্   ..  ১৩..
ব্রহমানন্দজলেনৈৱ লোকাঃ সরেৱ পরিপ্লুতাঃ   .
অচ্ছেদ্যোযমিতি ধ্যানমভিষেচনমাত্মনঃ   ..  ১৪..
নিরাৱরণচৈতন্যং প্রকাশোস্মীতি চিন্তনম্   .
আত্মলিঙ্গস্য সদ্ৱস্ত্রমিত্যেৱং চিন্তযেন্মুনিঃ   ..  ১৫..
ত্রিগুণাত্মাশেষলোকমালিকাসূত্রমস্ম্যহম্   .
ইতি নিশ্চযমেৱাত্র হ্যুপৱীতং পরং মতম্   ..  ১৬..
অনেকৱাসনামিশ্রপ্রপঞ্চোযং ধৃতো মযা   .
নান্যেনেত্যনুসন্ধানমাত্মনরচন্দনং ভৱেৎ   ..  ১৭..
রজঃসত্তৱতমোৱৃত্তিত্যাগরূপৈস্তিলাক্ষতৈঃ   .
আত্মলিঙ্গং যজেন্নিত্যং জীৱন্মুক্তিপ্রসিদ্ধযে   ..  ১৮..
ঈশ্ৱরো গুরুরাত্মেতি ভেদত্রযৱিৱরিজতৈঃ   .
বিল্ৱপত্রৈরদ্ৱিতীযৈরাত্মলিঙ্গং যজেচ্ছিৱম্   ..  ১৯..
সমস্তৱাসনাত্যাগং ধূপং তস্য ৱিচিন্তযেৎ   .
জ্যোতিরমযাত্মৱিজ্ঞানং দীপং সন্দরশযেদ্বুধঃ   ..  ২০..
নৈৱেদ্যমাত্মলিঙ্গস্য ব্রহমাণ্ডাখ্যং মহোদনম্   .
পিবানন্দরসং স্ৱাদু মৃত্যুরস্যোপসেচনম্   ..  ২১..
অজ্ঞানোচ্ছিষ্টকরস্য ক্ষালনং জ্ঞানৱারিণা   .
ৱিশুদ্ধস্যাত্মলিঙ্গস্য হস্তপ্রক্ষালনং স্মরেৎ   ..  ২২..
রাগাদিগুণশূন্যস্য শিৱস্য পরমাত্মনঃ   .
সরাগৱিষযাভ্যাসত্যাগস্তাম্বূলচরৱণম্   ..  ২৩..
অজ্ঞানধৱান্তৱিধৱংসপ্রচণ্ডমতিভাস্করম্   .

আত্মনো ব্রহ্মতাজ্ঞানং নীরাজনমিহাত্মনঃ .. ২৪..
ৰিৰিধব্রহ্মসংদৃষ্টিরমালিকাভিরলঙকৃতম্ .
পূরণানন্দাত্মতাদৃষ্টিং পুষ্পাঞ্জলিমনুস্মরেৎ .. ২৫..
পরিভ্রমন্তি ব্রহ্মাণ্ডসহস্রাণি ময়ীরৰরে .
কূটস্থাচলরূপোহমিতি ধ্যানং প্রদক্ষিণম্ .. ২৬..
ৰিশ্ৰৰন্দ্যোহমেৰাস্মি নাস্তি ৰন্দ্যো মদন্যতঃ .
ইত্যালোচনমেৰাত্র স্ৰাত্মলিঙ্গস্য ৰন্দনম্ .. ২৭..
আত্মনঃ সত্ক্রিয়া প্রোক্তা করতৰযাভাৰভাৰনা .
নামরূপৰযতীতাত্মচিন্তনং নামকীরতনম্ .. ২৮..
শ্রৰণং তস্য দেৰস্য শ্রোতৰযাভাৰচিন্তনম্ .
মননং ত্ৰাত্মলিঙ্গস্য মন্তৰযাভাৰচিন্তনম্ .. ২৯..
ধ্যাতৰযাভাৰৰিজ্ঞানং নিদিধ্যাসনমাত্মনঃ .
সমস্তভ্রান্তিৰিক্ষেপরাহিত্যেনাত্মনিষ্ঠতা .. ৩০..
সমাধিরাত্মনো নাম নান্যচ্চিত্তস্য ৰিভ্রমঃ .
তত্রৈৰ বহ্মণি সদা চিত্তৰিশ্রান্তিরিষ্যতে .. ৩১..
এৰং ৰেদান্তকল্পোক্তস্ৰাত্মলিঙ্গপ্রপূজনম্ .
কুরৰন্না মরণং ৰাপি ক্ষণং ৰা সুসমাহিতঃ .. ৩২..
সরৰদুরৰাসনাজালং পদপাংসুমিৰ ত্যজেৎ .
ৰিধূযাজ্ঞানদুঃখৌঘং মোক্ষানন্দং সমশ্নুতে .. ৩৩..
.. ইতি শ্রীমত্পরমহংসপরিৰরাজকাচার্যস্য শ্রীগোৰিংদভগৰত্পূজ্যপাদ
শিষ্যস্য শ্রীমচ্ছ্ঙকরভগৰতঃ ৰিরচিতা নিরগুণমানসপূজা সমাপ্ত ..

---

Please send corrections to Sunder Hattangadi (sunderh@hotmail.com)